© August 2024 | IJIRT | Volume 11 Issue 3 | ISSN: 2349-6002

# तैत्तिरीयोपनिषदनुसारेण ब्रह्मणः तटस्थस्वरूपलक्षणविमर्शः

*विद्वान् मञ्जेशः एम्*
*अतिथि उपन्यासकः*
*बेङ्गलूरु विश्वविद्यालयः बेङ्गलूरु कर्नाटकम्*
*Email – manjeshacharyam@gmail.com*

शोधसारः

उप नि इति उपसर्गद्वयपूर्वकात् विशरणगत्यवसादनार्थकात् षदलृ इत्यस्मात् धातोः उत्पन्नः उपनिषदिति शब्दः अज्ञाननाशके, ब्रह्मप्रापके जरामृत्यूपवृन्दादीनां शिथिलीकरणे वर्तते। एतानि सर्वाणि अपि फलानि ब्रह्मविद्यायाः एव इत्यतः ब्रह्मविद्या एव उपनिषत् इति फलितः अर्थः। तत्र प्राणिनां भिन्नरुचित्वात् तदनुकूलबोधनद्वारेण पृथक्शैल्या वा उपनिषत् अनेकधा विभक्ता। तत्र उपनिषदां संख्याविषये अनेके विप्रतिपद्यन्ते, केचन तत्र द्विशतमपि उपनिषदः इति वदन्ति। किन्तु तस्य तत्र प्रमाणाभावात् १०८ उपनिषदः एव स्वीक्रियन्ते। तत्र च मुक्तिकोपनिषदः श्रुतिः एव प्रमाणम्, यथाचोक्तम्-

**सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्।**
**सकृच्छ्रवणमात्रेण सर्वाघौघनिकृन्तनम्॥**[1]

एतासु अष्टोत्तरशतम् उपनिषत्सु वेदान्तयोगसांख्यवैष्णवशैवशाक्तदिशास्त्राणां प्रमेयरूपेण तेषां विभागोऽपि परिकल्पितः अस्ति। किन्तु एतासामुपनिषदां प्रामाण्याप्रामाण्यादिविषये पौरुषेयापौरुषेयादिविषये साम्प्रदायिकाः विप्रतिपद्यन्ते। किन्तु जीवब्रह्मैकबोधनपराः दशोपनिषदः एव प्रामाणिकाः, अनेकैः आचार्यैः व्याख्याताश्च।

ताः च यथा-

**ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः।**
**ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा॥**[2]

अत्र च विशेषेण तैत्तिरीयोपनिषदः अनुसारेण ब्रह्मणः तटस्थस्वरूपलक्षणविमर्शः भाष्यसारेण प्रस्तूयते।

**मुख्यप्रतिपाद्यविषयः**

अस्मिन् तैत्तरीयोपनिषदः अनुवाके **सत्यंज्ञानमनन्तंब्रह्म** इति वाक्यं प्रतिपादयति ब्रह्मणः स्वरूपलक्षणम्। अत्र हि सत्यादिकं न ब्रह्मणः भिन्नं तन्मात्रस्यैव सत्पदार्थत्वात्। **सत्यम्-ज्ञानमनन्तं ब्रह्म। ब्रह्मविदाप्नोति परम्** इति वल्याः सूत्रभूतं वाक्यम् अत्र ब्रह्म इति शब्देन अयम् अर्थः बुध्यते इति वक्तुम् एषा ऋक् उच्यते, सत्यं ज्ञानम् अनन्तं ब्रह्म इति एतानि त्रीणि विशेषणानि विषयस्य ब्रह्मणः। वेद्यतया विवक्षितत्वात् विशेष्यत्वं ब्रह्मणः। विशेषत्वादेव एतानि पदानि एकविभक्त्यन्तानि समानाधिकरणानि च। नीलं महत्सुगन्धमुत्पलम् इति वत्। सत्यादिभिः त्रिभिः विशेष्यमाणं ब्रह्म विशेष्यान्तरेभ्यो निर्धार्यते।

अत्र प्रश्नः वर्तते, ननु विशेषणस्य विशेषणत्वं तदैव सिध्यति यदा विशेषणं विशेष्यं विशेषणान्तरेभ्यः व्यावर्तयति। यद् अनेकानि द्रव्याणि एकजातीयानि विशेषणयोगिनी च भवति। तदा विशेषणस्य सार्थक्यं भवति। यथा नीलम् उत्पलम्। अत्र नीलं विशेष्यमाणं उत्पलं विशेष्यम्। अत्र नीलम् इति वर्णः अन्येभ्यः वर्णेभ्यः उत्पलं व्यावर्तते परन्तु असौ एक आदित्यः इत्यत्र विशेषणान्तर अयोगात् अर्थवत्वं नास्ति। प्रकृते अद्वितीयत्वश्रवणात् विशेषणार्थस्य सत्यं ज्ञानम् अनन्तं ब्रह्म इति वाक्यस्य अर्थवत्वं नास्ति इति पूर्वपक्षिणाम् आक्षेपः।

अत्र लक्षणार्थत्वात् विशेषणानाम्। अत्र एतानि लक्षणार्थप्रधानानि न तु विशेषणार्थप्रधानानि। तर्हि कः भेदः लक्ष्यलक्षणयोः विशेषविशेषणयोः इति प्रश्नः। यत् पदं स्वाधिकरणं स्वसमानजातीयेभ्यः व्यावर्तयति तद् पदं विशेषणमित्युच्यते तदधिकरणञ्च विशेष्यम्।

सजातीयेभ्यः विजातीयेभ्यः व्यावर्तनं लक्षणम् इत्युच्यते। यथा अवकाशदातृत्वं आकाशस्य लक्षणम्। प्रकृते सत्यं ज्ञानम् अनन्तं ब्रह्म इत्यत्र सत्यादीनि त्रीणि सजातीयेभ्यः विजातीयेभ्यः च ब्रह्मणः व्यावर्तनं कुर्वन्ति। एतेषां सत्यादीनां परार्थत्वात् विशेष्यार्थत्वाच्च परस्परं न सम्बध्यन्ते।

किं तत् सत्यत्वम् इति उच्यते। यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति , तत् सत्यम्। उदाहरणार्थं रज्वात्मकं वस्तु न कदापि रज्जुत्वरूपं परित्यज्यति तत् सत्यम्। तदेव रज्वात्मकं वस्तु कालान्तरे तद्रूपं परित्यज्य सर्पत्वरूपेण परिणमते चेत् तदनृतमिति कथ्यते। **(यदरूपेण निश्चितं यत्तद्रूपं व्यभिचरदनृतमित्युच्यते)।** अतः विकारः अनृतमिति कथ्यते। **"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"** इति छान्दोग्योपनिषदि। तस्मात् सत्यं ब्रह्म एव। इदानीं सत्यत्वं प्रतिपादितं ब्रह्मणः। तस्मात् कारणत्वं, कारणत्वात् कारकत्वं च। कारकत्वात् वस्तुत्वं प्राप्तं तस्मात् अचिद्रूपता प्राप्ता ब्रह्मणः। ब्रह्म अचेतनं वस्तुत्वात् मृदादिवत् अतः सिद्धान्ति कथयति अस्य दोषस्य परिहाराय ज्ञानमिति दलं योजयामः इति। ज्ञानपदेनापि ब्रह्मणः कारकत्वनिवृत्तिः न लभ्यते। कर्तृसाधनत्वात् ज्ञानपदस्य। अत्र अयम् अंशः ज्ञातव्यः यत्, "ज्ञा" धातोः भावे ल्युटि ज्ञानमिति शब्दः सिद्ध्यति। अत्र ज्ञानशब्दः व्युत्पत्या ज्ञानसाधनः। तस्मात् ज्ञप्तिः अवबोधः इत्यर्थः। (कर्तरि व्युत्पत्या) ज्ञायते अनेन इति ज्ञानशब्दस्य व्युत्पत्तिः न कार्या। सत्यानन्ताभ्यां पठितत्वात् ज्ञानशब्दः। यदि ज्ञानकर्तृत्वं स्वीक्रियते तर्हि ब्रह्मणः सत्यता अनन्तता च न भवति ज्ञाकर्तृत्वेन विक्रियमाणत्वं वर्तते तस्मात् सत्यता अनन्तता च न भवति। यद्धि न कुतश्चित् प्रविभज्यते तदनन्तरम् इति लक्षणं ज्ञानकर्तृत्वे ज्ञेयज्ञानाभ्यं प्रविभक्तमित्यतः अनन्तता न भवति। **"यत्र न अन्यद् विजानाति सः भूमा अथ यत्र अन्यद् विजानाति तदल्पम्"** इति श्रुतिः। अत्र प्रश्नः यत्र न अन्यद् विजानाति स भूमा इत्यत्र अन्यस्य विशेष्यप्रतिषेधः कुतः इति चेत् सामर्थ्यात् इति । अर्थात् यः स्वात्मानं विजानाति स भूमा इत्यर्थः लभ्यते। तस्मात् ब्रह्मणः द्वैतराहित्ये न इयं श्रुतिः मानम् इति चेत् न ।अनया श्रुत्या तु भूमलक्षणं विधीयते अत्र भूम इत्यनेन ब्रह्म इत्यर्थः स्वीक्रियते। यः अन्यद् न पश्यति सः भूमा इति लक्षणपरम् इदं वाक्यम्। अन्यः अन्यद् पश्यति इति प्रसिद्धम् उपादाय यत्र तन्नास्ति सः भूमा इति ब्रह्मणः स्वरूपं वर्ण्यते। अत्र अन्यदर्शनग्रहणस्य निषेधः क्रियते। न तु इदं स्वात्मनि क्रियास्तित्वपरम्। यदि आत्मनः ज्ञेयत्वम् उच्यते तर्हि ज्ञात्रभावप्रसङ्गः तस्मात् ब्रह्म न ज्ञेयम्।

[1] मुक्तिकोपनिषद् १

[2] मुक्तिकोपनिषद् १-३०

आत्मा एकः एव ज्ञाता ज्ञेयः भवतु इति चेत् न, युगपदनाशत्वात्। एकस्य निरवयवस्य ब्रह्मणः ज्ञेयत्वं ज्ञातृत्वञ्च न सम्भवति। यदि ब्रह्मणः घटादिवत् ज्ञेयत्वं उच्यते तर्हि तस्य उपदेशः व्यर्थस्यात्। ब्रह्मणः ज्ञातृत्वे सत्यत्वं न सम्भवति। एवं च सत्यानन्तशब्दाभ्यां विशेषणत्वेन सह पठितत्वात् ज्ञानशब्दः कर्तृत्वादि कारकनिवृत्यर्थं तथैव मृदादि अचिद्रूपता निवृत्यर्थं ब्रह्म विशेषणम्। एतादृशे ज्ञानशब्दप्राप्ते ब्रह्मणः लौकिकज्ञानप्रसङ्गः, तस्मात् अनन्तमिति दलं सार्थकम्। एवं च सत्यादीनाम् अनृतादि धर्ममुखेन ब्रह्मणः विशेषणे सिद्धे प्रश्नः।

अत्र अनृतादिधर्म: नाम मिथ्यात्वभाव: सत्यम्। परप्रकाश्यभाव: ज्ञानम्। त्रिविधपरिच्छेद: शून्यम् अनन्तम्। यथा नीलमिति विशेषणस्य सार्थक्यम्। परन्तु अत्र ब्रह्मण: अप्रतिसिध्दत्वात् यथा –

**मृगतृष्णाम्भसिस्नात: खपुष्पकृतशेखर:।**

**एष वन्ध्यासुतो याति शशशृङ्गधनुर्धर: ॥**[3]

इत्यत्र विशेषणानां शून्यार्थत्वं तथैव ब्रह्मविशेषणानां शून्यार्थं प्राप्यते। एवं चेत् सत्यादि वाक्यानि व्यर्थानि इति चेत् , न। लक्षणार्थत्वात् तेषाम्। सत्यादि शब्दानां विशेषणार्थानां लक्षणार्थप्राधान्यात् लक्ष्यं किञ्चित् भवत्येव तत् लक्ष्यं ब्रह्म। विशेषणार्थत्वेपि न स्वार्थपरित्यागः। यदि सत्यादीनां शून्यपरत्वं तर्हि तेषां विशेष्यं व्यावर्तकं न स्यात्। अत्र तु सत्यादयः स्वार्थेन ब्रह्मणः स्वरुपं कथयन्तः अन्येभ्यः विषयेभ्यः एनं विशेष्यं व्यावर्तयन्ति। सत्यादीनां कः स्वार्थः इत्युक्तौ, सत्यम् अबाधितस्वरुपम्। ज्ञानं स्वयं प्रकाशरुपम्। अनन्तं सर्वव्यापकत्वम्। एवं सत्यज्ञानानन्तशब्दैः स्वार्थसमर्पणेन एव विशेषणानि भवन्ति। एतेभ्यः ब्रह्म लक्ष्यते। (न तु उच्यते )। "**यतो वाचो निवर्तन्ते"** इति श्रुतिर्मानम्। तस्मात् **सत्यं ज्ञानमनन्तं ब्रह्म** इति सिद्धम्।

**परिशीलितग्रन्थसूचिः**


१. ब्रह्मसूत्रशांकरभाष्यम्, स्वामी सत्यानन्दसरस्वती, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली

२. ब्रह्मसूत्रशांकरभाष्यम् भामती, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली

३. ईशादि नव उपनिषद्, सभाष्य, गीताप्रेस गोरखपुर

४. उपनिषद्भाष्यम्, दक्षिणामूर्तिमठ प्रकाशन, वाराणसी

५. जैमिनीयसूत्रम्, मुरलीधरशर्मा, प्राभाकरीययन्त्रालयम्, काशी

६. जैमिनीयसूत्रम्. श्री सीतारामशर्मा, चौखम्बाविद्याभवन वाराणसी

७. अर्थसंग्रहः, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली

८. भारतीयदर्शन चौखम्बा संस्कृत प्रतिष्ठान दिल्ली


[3] सुरेश्वरवार्तिकम्